International Journal of Sanskrit Research 2021; 7(3): 16-19

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(3): 16-19
© 2021 IJSR
www.anantaajournal.com
Received: 11-03-2021
Accepted: 15-04-2021

**अर्पिताप्रामानिकः**
सहकारी अध्यापिका, कृष्णचन्द्र कलेज, हेतमपुर, वीरभूम, पश्चिमवङ्गाल, भारत

**Corresponding Author:**
**अर्पिताप्रामानिकः**
सहकारी अध्यापिका, कृष्णचन्द्र कलेज, हेतमपुर, वीरभूम, पश्चिमवङ्गाल, भारत

# पणिनीयसमासे आदेशसमीक्षा

## अर्पिताप्रामानिकः

## प्रस्तावना

"वाङ्मयानीह शास्त्राणि वाङ्निष्ठानि तथैव चश्दृमहर्षेः भरतमुने इदं श्लोकमाधारीकृत्य उच्यते यत्–इह जगति मनुष्याः प्रधानतः वाचा एव स्वेषामभिप्रायम् प्रकाशितवन्तः। सम्यक्रूपेण प्रयुक्ता वाक् कामधेनोः तुल्यम्–"एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः शास्त्रान्वितः स्वर्गे लोके च कामधुग् भवति।"[1] इह वाक्संसारे व्याकरणमन्तरेण वाक्शुद्धिर्न जायते। अतः भाषायाः परिशुद्ध्यर्थम् व्याकरणमवश्यमध्येयम्। 'वि' पुर्वाद् 'आङ्' पुर्वाच्च 'कृ' धातोः करणे ल्युटि व्याकरणशब्दो निष्पद्यते। "व्याक्रीयन्ते व्युत्पद्यन्ते प्रकृतिप्रत्ययादि विभागेन शब्दा अनेन" इति व्याकरणशब्दस्य विग्रहार्थः। भगवान् वेदपुरषमुखरूपत्वादिदं सर्वेषाङ्गेषु मुख्यमस्ति। अतएव भाष्यकृतोक्तं महाभाष्ये पस्पशाह्निके–"प्रधानं च षट्ष्वङ्गेषु व्याकरणमिति।"[2] तत्र पाणिनीयशिक्षायां ह्यक्तं "मुखं व्याकरणं स्मृतम्"[3] इति । व्याकरणज्ञानं विना कवेः रचयितुः वा पदरचना न सम्भवति। अस्य शास्त्रस्य महत्वप्रतिपादनावसरे भर्तृहरिणा उक्तं यत्–

"अर्थप्रवृत्तितत्त्वानां शब्दा एव निवन्धनम्।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते।।"[4]

"युगे युगे व्याकरणम्"[5] इति वचनानुसारेण समयि समयि विविधेषु व्याकरणग्रन्थेषु रचिते सति महर्षिणा पाणिनिना 'अष्टाध्यायी' इति ग्रन्थ अधुनापि श्रेष्ठरूपेण परिकीर्त्यते। संस्कृतभाषायाम् अपदैः वाक्यनिर्माणं न सम्भवति–"नापदं शास्त्रे प्रयुञ्जीत" । वाक्यगठने यथा धातुभ्यः शब्देभ्यश्चोत्तरं विभक्तियोगेन पदजातं निष्पद्यते समासनिर्माणे तथा अवयवजातमेव पदमुच्यते(वाणीनिक्कणः,पृ.३४)। परन्तु किं नाम समासः? इति जिज्ञासायामुच्यते यत्–"सम् असनं समासः"। 'सम्' पूर्वकम् 'अस्' धातोः भावे 'घञ्'[6] प्रत्ययेन 'समासः' इति पदं निष्पन्नम्। द्वयोर्वहुनां वा पदानाम् एकपदीभवनं समासः। संस्कृतभाषाशिक्षायाम् समासज्ञानस्य आवश्यकता अतीव वर्तते। "नैषधचरितम्" इति महाकाव्यस्य अन्तिमे श्रीहर्षेणोक्तं –

"ग्रन्थग्रन्थिरिह क्वचित्–क्वचिदपि न्यासि प्रयत्नान्मया
प्राज्ञन्मन्यमना हठेन पठिती मास्मिन् खलः खेलतु।

श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थिः समासादय–

त्वेततकाव्यरसोर्मिमज्जनसुखव्यासज्जनं सज्जनः।।"[7]

समसिकशब्दप्रयोगेन शास्त्रकाराः ग्रन्थकाराश्च स्वाशयं प्रकटीकुर्वन्ति। अतएव शास्त्रप्रयुक्तशब्दानां अर्थाववोधे समासस्य ज्ञानम् अतीव अपेक्षितम् वर्तते। यद्यपि 'अष्टाध्यायी' इति ग्रन्थे पाणिनिना समासस्य किमपि लक्षणसूत्रम् न कृतम्, परन्तु "समर्थः पदविधिः"[8] इति सूत्रेण समासस्य पदविधित्वम् ज्ञापितम्। पाणिनीयसमाससम्वन्धीनः कश्चनः साधारणविधिः वर्तते। संस्कृतव्याकरणे आगमादेशलोपादयोः साधारणविधिशब्देन परिचीयन्ते। पाणिनीयसमाससम्वन्धिनी साधारणविधिषु आदेशविधिः सोदाहरणम् अस्मिन् शोधप्रवन्धे आलोच्यते।

## आदेशः

संस्कृतव्याकरणे पारिभाषिकशब्दमेकम् आदेशशब्दम्। "रूपान्तरप्राप्तिरादेशः"[9] इति वचनानुसारेण रूपान्तरप्राप्तिः हि आदेशशब्देन परिचीयते। किन्तु कस्य केषाम्वा रूपान्तरप्राप्तिः? इति पृच्छायायामुच्यते यत्, प्रकृतेः प्रत्ययस्य च रूपान्तरप्राप्तिः। अतः शाब्दिकाः कथ्यन्ते –"आदेश उपघाती यः प्रकृतेः प्रत्ययस्य वा"[10]।

अत्रेदमुल्लेखं यत् न केवलम् प्रकृतेः प्रत्ययस्य वा; ध्वनेः वर्ण्यस्य धातोः प्रातिपदिकस्य विभक्तेः चापि आदेशः भवति। किन्त्वादेशः कीदृशम् भवति? आदेशः स्थानिवद्भवति–''स्थानिवदादेशः''। अपि च ''शत्रुवदादेशः'' इति आभाणकानुसारे कथ्यते, इह खलु संसारे दृश्यते यत्, शत्रुः यथा तस्य प्रतिपक्षं सम्पूर्णभावेन पराजित्य तस्य सम्पूर्णं स्थानं कवलीकृतं करोति, आदेशः तथैव शत्रुब्द्भवति। सः किमपि वर्णं वर्णसमूहं वा, पदं पदसमूहं वा उपघातं कृत्वा तस्य तेषाम् वा स्थानदखलं करोति। पाणिनीयसमासप्रकरणे पदगठनार्थं आदेशबिधायकानाम् सूत्राणाम् अतीव प्रयोजनमस्ति। पाणिनीयसमाससम्वन्धीनि आदेशविधायकानि प्राय एकपञ्चाशत् सूत्राणि विंशतिश्च आदेशः दृश्यन्ते। समासप्रकरणे आदेशः साधारणतः द्विप्रकारो जायते–क) अन्तादेशः ख) सर्वादेशश्च। अधो एतेषामालोचना विधीयते–

### क) अन्तादेशः
''अलोऽन्तस्य''[11] अनेन परिभाषासूत्रेण षष्ठीनिर्दिष्टेन विधीयमानकार्यस्य अन्तादेशः भवति। आचार्येण भट्टोजिदीक्षितेन आह–''षष्ठीनिर्दिष्टस्य अन्तस्य अलः आदेशः स्यात्।''[12]

### आवर्णादेशः
आवर्णादेशस्य उदाहरणं यथा–''आन्महतः समानाधिकरणजातीययोः''[13]। 'महान् चासौ ब्रह्मा च' इति लौकिकविग्रहे 'महत् सु ब्रह्मन् सु ' इत्यलौकिकविग्रहे ''सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः''[14] इति सूत्रेण तत्पुरुषसमासे उपसर्जनपूर्वकत्वात् सुब्लुकि उपसर्जनसंज्ञकस्य 'महत्' इत्यस्य पूर्वनिपाते 'महत् ब्रह्मन्' इति जाते ''आन्महतः समानाधिकरणजातीययोः'' इति सूत्रेण ''अलोऽन्तस्य''(१/१/५३) इति परिभाषासूत्रेण च षष्ठीनिर्दिष्टस्य महत्–इत्यस्य अन्त्य त्कारस्य आकारादेशे सवर्णदीर्घे समासान्तटच्प्रत्यये अनुवन्धलोपे च 'महाब्रह्मः' इति पदम् सिद्धम्। एवम् 'महाजातीयः' 'महादेवः चेति रूपाणां सिद्धिर्जायते।

सूत्रान्तराणि यथा–

1. ''द्वयष्टनः संख्यायामबहुव्रीह्यशीत्योः''[15]। द्वन्द्वसमासविधायकसूत्रमिदम्। उदाहरणं यथा–द्वादशः। 'द्वौ च दश च' इति विग्रहे द्वन्द्वसमासे सुब्लुकि 'द्वि' इत्यस्य पूर्वनिपाते 'द्विदशन्' इत्यवस्थायाम् ''द्वयष्टनः संख्यायामबहुव्रीह्यशीत्योः'' इति सूत्रेण 'द्वि' इत्यस्य आकारान्तादेशे 'द्वादशन्' इति जाते प्रातिपदिकत्वात् अनुवन्धलोपे 'द्वादशः' इति पदम् सिद्धम्।
2. ''विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्।''[16] आकारस्य अन्तादेशविधायकम् वैकल्पिकम् सूत्रमिदम्। चत्वारिंशत् प्रभृति शब्दाः उत्तरपदे सति 'द्वि' 'अष्टन्' चेति शब्दयोः अन्त्यवर्ण्यस्य स्थाने विकल्पे आकारादेशः स्यात्। उदाहरणं यथा–द्विचत्वारिंशत् द्वाचत्वारिंशद्वा।

### अनङादेशः
अनङादेशविधिः बहुव्रीहिसमासे परिलक्ष्यते। ''धनुषश्च''(५/४/१३२) इति सूत्रानुसारेण बहुव्रीहौ 'धनुस्' शब्दस्य अन्त्य स्कारस्य स्थाने 'अनङादेशः स्यात्। किन्तु अत्र एकम् शङ्का जायते। 'अनङ्' इति आदेशः अनेकालत्वात् ''अनेकाल् शित् सर्वस्य''[17] इति परिभाषासूत्रवलेन सर्ववर्णादेशः भवेत् । किन्तु इत्यस्य अन्तादेशः कथम् भवति? एषा शङ्का ''ङिच्च''[18] इति परिभाषासूत्रवलेन दूरीभूता भवति। इदं परिभाषासूत्रवलेन 'अनङ्' इत्यस्य ङित्वात् अनेकाल् सत्त्वेऽपि अस्य आदेशः अन्त्यवर्णस्थाने एव भवति। यथा–'शाङ्र्गं धनुः यस्याः सा' इति विग्रहे बहुव्रीहिसमासे प्रातिपदिकसंज्ञायाम् सुब्लोपे 'शङ्र्ग धनुस्' इत्यवस्थायाम् ''धनुषश्च''(५/४/१३२) इत्यनेन अन्त्य स्कारस्य स्थाने अनङादेशः भवति।

सूत्रान्तराणि यथा–''वा संज्ञायाम्''[19]। उदाहरणं–शतधन्वा शतधनुर्वा।

### निङ्–आदेशः
बहुव्रीहौ 'जाया' शब्दस्य अन्त्य आवर्णस्य स्थाने निङादेशः भवति। सूत्रम्–''जायायाः निङ्''[20]। 'युवति जाया यस्य' इति विग्रहे बहुव्रीहिसमासे प्रातिपदिकसंज्ञायाम् विभक्तिर्लोपे 'जाया' शब्दस्य अन्त्य आवर्ण्यस्य स्थाने निङादेशे य्–कारलोपे पूर्वपदस्य पुम्बद्भावे पुंलिङ्गप्रथमैकवचने 'युवजानिः' इति पदम् सिद्धम् भवति। 'निङ्' अनेकाल् सत्त्वेऽपि ''ङिच्च''(१/१/५३) इति परिभाषासूत्रवलेन ङित्वात् अन्तवर्ण्यस्य स्थाने एव भवति।

### इदादेशः
''अलोऽन्तस्य''(१/१/५३) इति परिभाषासूत्रवलेन 'इत्' अन्तादेशः। परन्तु कस्य? इति जिज्ञासायाम् उच्यते ''षष्ठीनिर्दिष्टस्य अन्त्यस्य अलः इदादेशः स्यात् ''(भट्टोजीकृतः वृत्तिः)। उदाहरणं यथा–''गन्धस्येदूत्पूतिसुसुरभिभ्यः[21]' इति। 'उद्गतः गन्धः अस्य' इति विग्रहे बहुव्रीहिसमासे षष्ठीनिर्दिष्टस्य गन्धशब्दस्य अन्त्य अवर्ण्यस्थाने इदादेशे अनुवन्धलोपे च 'उद्गन्धिः' इति पदं सिद्धम्। सूत्रान्तराणि यथा–

1. ''अल्पाख्यायाम्''[22]।
2. ''उपमानाच्च''[23]।

### आनङादेशः
द्वन्द्वसमासे आनङादेशविधिः परिलक्ष्यते। उदाहरणम् ''आनङ्ऋतो द्वन्द्वे''[24]। उत्तरपदे परे विद्यासम्वन्धवाची योनिसम्वन्धवाची वा ऋदन्तस्य पदस्य च द्वन्द्वसमासे 'आनङ्' इत्यस्य अन्तादेशः स्यात्। अत्र ''ङिच्च''(१/१/५३) इति परिभाषासूत्रवलेन 'आनङ्' इत्यस्यादेशः अनेकालसत्त्वेऽपि अन्तवर्णस्य स्थाने भवति। यथा 'होतापोतारौ'। 'होता च पोता च' इति लौकिकविग्रहे 'होतृ' पदस्य अन्त्य ऋकारस्य स्थाने ''ङिच्च''(१/१/५३) इति परिभाषासूत्रवलेन 'आनङादेशः भवति। एवम् ''देवताद्वन्द्वे च''[25] इति सूत्रेण देवतावाचकद्वन्द्वसमासे उत्तरपदे परे 'आनङ्' अन्तादेशः स्यात्। अत्रोऽपि ''ङिच्च''(१/१/५३) इति परिभाषासूत्रवलेन 'आनङ्' अन्तादेशः। मित्रश्च वरुणश्चेति विग्रहे ''चार्थे द्वन्द्वः''(२/२/२९) इत्यनेन इतरेतरयोगे द्वन्द्वे प्रातिपदिकत्वात् सुपो लुकि ''आनङ्ऋतो द्वन्द्वे''(६/३/२५) इत्यस्याप्राप्त्या ''देवताद्वन्द्वे च''(६/३/२६) इति सूत्रेण उत्तरपदे परे आनङादेशे पदत्वान्नलोपे विभक्त्यादिकार्ये प्रथमाद्विवचने 'मित्रावरुणौ' इति रूपम् सिद्धम्।

### ईदादेशः
ईदादेशः द्वन्द्वसमासे अग्निशब्दमुद्दिश्य विहितः। ''ईदग्ने सोमवरुणयोः''[26] सूत्रेण सोमशब्दे वरुणशब्दे च उत्तरपदे परे अग्नेरीदादेशः स्यात् देवताद्वन्द्वसमासे। उदाहरणं यथा–अग्नीसोमौ अग्नीवरुणौ च।

### अरङादेशः–
अरङादेशस्य उदाहरणं यथा–'मातापितरौ'। 'माता च पिता च' इति विग्रहे इतरेतरयोगद्वन्द्वे प्रातिपदिकसंज्ञायाम् सुब्लोपे ''मातरपितरावुदीचाम्''[27] इत्यनेन पूर्वपदस्य 'अरङ्' इत्यस्य अन्तादेशः स्यात्। किन्तु किमर्थम् 'अरङ्' इत्यस्य अन्तादेशः भवेदिति पृच्छायाम् ''ङिच्च''(१/१/५३) इति परिभाषासूत्रमेव मार्गं दर्शयति। अनेन परिभाषासुत्रवलेन 'अरङ्' अनेकाल् सत्त्वेऽपि ''अलोऽन्तस्य'' (१/१/५३) इति परिभाषासूत्रम् वाधित्वा अन्तादेशः भवति। अतःपरम् अनुवन्धलोपे विभक्तिकार्ये 'मातरपितरौ' इति पदम् निष्पद्यते।

### ख) सर्वादेशः
पाणिनीयसमाससम्वन्धीनः सर्वादेशसूचकम् बहुनि सुत्राणि दृश्यन्ते। किन्तु कस्य केषाम्वा सर्वादेशः भवति? इति जिज्ञासानिरसनाय ''अनेकाल् शित् सर्वस्य''[28] इति परिभाषासूत्रस्य प्रवृत्तिः। ''अनेकाल् शित् सर्वस्य'' इति परिभाषासूत्रवलेन अनेकाल्विशिष्ट आदेशः शिदादेश्च सर्वादेशः भवति।

**अमादेशः**
"नाव्ययीभावादतोऽम्त्वपञ्चम्याः"[29] इति सूत्रेण अदन्तादव्ययीभावात् सुपो न लुक् किन्त्वमादेशः। 'दिशयोः मध्ये' इति विग्रहे 'अप' इत्यस्य सुवन्तेन 'दिशा' शब्देन सह अव्ययीभावसमासे 'दिश ओस् अप' इत्यस्य प्रातिपदिकसंज्ञायाम् सुब्लुकि 'दिशा अप' इति जाते उपसर्जनसंज्ञकस्य 'अप' इत्यस्य पूर्वनिपाते 'अपदिशा' इति जाते "एकविभक्ति चापूर्वनिपाते"(१/२/४४) इत्यनेन दिशाशब्दस्योपसर्जनसंज्ञायाम् ह्रस्वे 'अपदिश सु' इति स्थिते अनुवन्धलोपे च 'अपदिश स्' इति जाते "अव्ययीभावश्च"(२/४/१८) इति सूत्रेण 'अपदिश' इत्यस्य अव्ययसंज्ञायाम् "अवययादाप् सुपः" (२/४/८२) इति सूत्रेण सु–लुक्प्राप्तेः "नाव्ययीभावादतोऽम्त्वपञ्चम्याः" इति सूत्रेण सोरमादेशः स्यात्। परन्तु कुत्र भवेत्? इति आशङ्कायाम् "येन विधिस्तदन्तस्य"[30] इति परिभाषावलेन "अदन्तात् अव्ययीभावात्" सुपो न लुक् तु पञ्चमीं विना अम् आदेशः स्यात्। तेन 'सु'–इत्यस्य सम्पूर्णस्थाने अमादेशे 'अपदिश अम्' इत्यावस्थायाम् पूर्वरूपैकादेशे 'अपदिशम्' इति पदम् सिद्धम्।

**अह्नादेशः**
अह्नादशेश्च उदाहरणं यथा–'पूर्वाह्णः'। 'पूर्वम् अहः' इति विग्रहे तत्पुरुषसमासे समासान्तठच्प्रत्यये 'पूर्व अहन् ठच्' इत्यावस्थायाम् अनुवन्धलोपे 'पूर्व अहन् अ' इति जाते "अह्नोऽह्न एतेभ्यः"[31] इत्यनेन 'अहन्' इत्यस्य स्थाने अह्नादेशः स्यात्। अनेकालत्वात् "अनेकाल् शित् सर्वस्य"(१/१/५५) इति परिभाषासूत्रवलेन 'अहन्' इत्यस्य सम्पूर्णस्थाने अह्नादेशः भवति। अत्रेदमुल्लेखं यत्, अह्नादेशस्य उपर्युक्तनियमस्य व्यतिक्रमोऽपि दृष्टिपथमायाति। तद्धि–
1. "न संख्यादेः समाहारे"[32]। प्रस्तुतसूत्रेण संखादेः तत्पुरुषस्य समाहारे वर्तमाने 'अहन्' शब्दस्य अह्नादेशः न स्यात्। "अह्नोऽह्न एतेभ्यः"(५/४/८८) अनेन सूत्रेन प्राप्तः अह्नादेशः "न संख्यादेः समाहारे" इत्यनेन प्रतिषिध्यते। उदाहरणं यथा– द्वयहः। अत्र 'अहन्' शब्दस्य अह्नादेशः न भवति।
2. "उत्तमैकाभ्यां च"[33] । अनेन सूत्रेण पुण्यशब्द एकशब्दः च परे अह्नादेशस्य निषेधः भवति। उदाहरणं यथा–पूण्याहम् एकाहश्चेति।

**त्रयसादेशः**
'त्रयश्च दशश्च' इति लौकिकविग्रहे द्वन्द्वसमासे 'त्रि 'इत्यस्य पूर्वनिपाते 'त्रिदशन्' इत्यवस्थायाम् "त्रेस्त्रयः"[34] इत्यनेन 'त्रि' इत्यस्य सम्पूर्णस्थाने त्रयसादेशः भवति। किमर्थं सम्पूर्णस्थाने भवति? इति जिज्ञासायामुच्यते "अनेकाल् शित् सर्वस्य" (१/१/५५) इति परिभाषासूत्रवलेन 'त्रयस्' अनेकालत्वात् 'त्रि' इत्यस्य सम्पूर्णस्थाने त्रयसादेशः भवति।

**नसादेशः**
बहुव्रीहिसमासे 'नासिका' शब्दस्य स्थाने नसादेशः स्यात्। सूत्रम्–"अञ् नासिकायाः संज्ञायां नसं चास्थूलात्"[35]। अनेकालत्वात् नसादेशः' सर्वादेशः। 'द्रु इव नासिका यस्य सः' इति लौकिकविग्रहे "अनेकमन्यपदार्थे"(२/२/२४) इत्यनेन बहुव्रीहिसमासे प्रातिपदिकसंज्ञायाम् विभक्तिर्लोपे "अञ् नासिकायाः संज्ञायां नसं चास्थूलात्" सूत्रेण 'अच्' प्रत्यये नसादेशे च णत्वे स्वादिकार्ये 'द्रुणसः' इति रूपम् सिद्धम्।

**ज्ञु–आदेशः**
बहुव्रीहौ जानुशब्दस्थाने 'ज्ञु' आदेशः भवति। सूत्रम्–"प्रसंभ्यां जानुनोर्ज्ञुः"[36]। अनेकवर्णविशिष्टत्वात् "अनेकाल् शित् सर्वस्य" (१/१/५५) इति परिभाषासूत्रवलेन 'जानु' इत्यस्य सर्वादेशः भवति। यथा–'प्रगते जानुनी यस्य' इति लौकिकविग्रहे बहुव्रीहिसमासे "प्रादिभ्यो धातुर्यस्य" वार्तिकानुसारे समासे गतशब्दस्य पाक्षिकलोपे प्रातिपदिकसंज्ञायाम् सुब्लोपे च "प्रसंभ्यां जानुनोर्ज्ञुः" इत्यनेन 'जानु' इत्यस्य स्थाने 'ज्ञु' आदेशे पुंलिङ्गप्रथमैकवचने सुविभक्तौ सकारस्थाने रुत्वे विसर्गे च 'प्रज्ञुः' इति रूपमपि सिद्धम्।

सूत्रान्तरम्–"ऊर्ध्वाद्विभाषा"[37]। 'ज्ञु' आदेशविधायकम् वैकल्पिकम् सूत्रमिदम्। उदाहरणम्–ऊर्ध्वज्ञुः ऊर्ध्वजानुः वा।

**दत्रादेशः**
दत्रादेशविधायकम् सूत्रम् "वयसि दन्तस्य दतृ"[38]। अनेन सूत्रेण दन्तशब्दस्थाने दत्रादेशः भवति। अत्र "अनेकाल् शित् सर्वस्य"(१/१/५५) इति परिभाषावलेन 'दतृ' अनेकालत्वात् दन्तशब्दस्य सम्पूर्णस्थाने आदेशः भवति। उदाहणं –'द्विदन्'।

सूत्रान्तराणि–
1. "स्त्रियां संज्ञायाम्"(५/४/१४३)।
2. विभाषा श्यावारोकाभ्याम्"(५/४/१४४)।
3. अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च"(५/४/१४५)।

**द्यावादेशः**
"दिवो द्यावा"(६/३/२६) इत्यनेन देवताद्वन्द्वे उत्तरपदपरे 'दिव्' शब्दस्य स्थाने "द्यावादेशः स्यात्। उदाहरणम्–द्यावाभूमी।

सूत्रान्तरम्– "दिवसश्च पृभिव्याम्"(६/३/६0) इति।

**पदादेशः**
"पादस्य पदाज्यातिगोपहतेषु"[39] अनेन सूत्रेण आजि, आति, ग, उपहतश्च शब्दे परे पादस्य पदादेशः स्यात्। पदशब्द अनेकालत्वात् "अनेकाल् शित् सर्वस्य"(१/१/५५) इति परिभाषावलेन अस्य सर्वादेशः भवति। 'पादाभ्यां गच्छति' इत्यर्थे "अन्येभ्योऽपि दृश्यते" वार्तिकानुसारे गम्–धातोरुत्तरे ड–प्रत्यये डित्वात् टिलोपे "पादस्य पदाज्यातिगोपेहतेषु"(६/३/५२) सूत्रेण 'ग' इति शब्दः परे सति 'पाद' इति स्थाने पदादेशे विभक्तिकार्ये 'पदगः' इति रूपम् सिद्धम् भवति।

सूत्रान्तराणि–
1. "पद्यत्यतदर्थे"(६/३/६३)।
2. "हिमकाषिहतिषु च"(६/३/५४)।
3. "ऋचः शे"(६/३/५५)।
4. "वा घोषमिश्रशब्देषु"(६/३/५६)।

**उदादेशः**
उत्तरपदे परे सति संज्ञायाम् च उदकशब्दस्थाने उदादेशः भवति। उदाहरणम्–उदकमेघः। 'उदकगर्भ मेघः' इत्यर्थे समासे प्रातिपदिकसंज्ञायाम् च सुब्लोपे "उदकोस्योदः संज्ञायाम्"[40] इत्यनेन उदकस्थाने उदादेशे विभक्तिकार्ये 'उदमेघः' इति रूपम् सिद्धम्।
सूत्रान्तराणि–
1. "पेषं वासबाहनधिषु"(६/३/५८)।
2. "एकहलादौ पूरयितव्येऽन्यतरस्याम्"(६/३/५६)।
3. "मन्थौदसक्तुविन्दुवज्रभारहारवीवधगाहेषु च"(६/३/६0)।

**स–आदेशः**
सहशब्दस्थाने सादेशविधायकाणि सूत्राणि–
1. "सहस्य सः संज्ञायाम्"(६/३/७८)।
2. "ग्रन्थान्ताधिके च"(६/३/७६)।
3. "द्वितीये चानुपाख्ये"(६/३/८0)।
4. "समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु"(६/३/८४)।
5. "ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्ण–वयोवचनबन्धुषु""(६/३/८४)।
6. "चरणे ब्रह्मचारिणि""(६/३/८६)।
7. "तीर्थे ये""(६/३/८७)

8. ''विभाषोदरे''''(६/३/८८)।
9. ''दृग्दृश्वतुषु''(६/३/८९)।

**कदादेशः–**तत्पुरुषसमासे 'कु' इत्यस्य स्थाने कदादेशः स्यात्। सूत्राणि यथा–

1. ''कोः कत् तत्पुरुषेऽचि''(६/३/१०८)।
2. ''रथवदयोश्च''(६/३/१०२)।
3. तृणे च जातौ''(६/३/१०३)।
4. का पथ्यक्षायोः''(६/३/१०४)।
5. ईषदर्थे''(६/३/१०५)।
6. विभाषा पुरुषे''(६/३/१०६)।

**कवादेशः कादेशश्च–** तत्पुरुषसमासे 'कु' इत्यस्य स्थाने कवादेशः कादेशश्च विधायकमेकम् सूत्रम् दृश्यते। यथा–

1. ''कवं चोष्णे''(६/३/१०७)। उदाहरणम्– कोष्णम् कवोष्णम् वा।

**उपसंहृतिः**

अतः समाससम्वन्धीनि आदेशविधायकानि सूत्राणि पर्यालोच्यमाने तथ्यमिदमायाति यत् समासगठने आदेशानि तथा आदेशविधायकानि सूत्राणि अतीव प्रयोजनीयानि। न केवलम् आदेशविधायकानां सूत्रानां परिभाषासूत्रानामपि अतीव गुरुत्वमस्ति। अत्र तत्रभवती भगवती महर्षेः पाणिनेः महती सूक्ष्मेक्षिका वर्तते। अतएव साधूक्तम्–

''पाणिनीयं शब्दशास्त्रं पदसाधुत्वलक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चनः।।''[41]

**अन्तटीका–**

1. श्रुतिवचनमिदं महाभाष्ये ''एकः पूर्वपरयोः'' इति सूत्रे उद्धृतम्।
2. महाभाष्ये पस्पशाह्निके–मूल–7।
3. ''पाणिनीयशिक्षा'' श्लोक ४२।
4. वाक्यपदीयम् 1।13
5. व्याकरण दर्शनेर इतिहास, १म खण्ड, १३५० वङ्गाब्द सं पृः १८।
6. ''अकर्तरि च कारके संज्ञायाम्''। अष्टाध्यायी ३/३/१९।
7. भूमिका, वैयाकरणसिद्धान्तकौमुद्याः समासप्रकरणम्, प्रथमः भागः, डः तपनशङ्कर भट्टाचार्य।
8. पा.अ.२/१/१।
9. व्याकरण दर्शनेर इतिहास, गुरुपद हालदार पृः१६६।
10. व्याकरण दर्शनेर इतिहास, गुरुपद हालदारए पृः१६६।
11. पा.अ. १/१/५३
12. पा.अ. १/१/५३ सूत्रस्य भट्टोजीकृतः वृत्तिः।
13. पा.अ. ६/३/४६
14. पा.अ. २/१/६१
15. पा.अ. ६/३/४७
16. पा.अ. ६/३/४६
17. पा.अ. १/१/५८
18. पा.अ. १/१/५३
19. पा.अ. ५/४/१३३
20. पा.अ. ५/४/१३४
21. पा.अ. ५/४/१३५
22. पा.अ. ५/४/१३६
23. पा.अ. ५/४/१३७
24. पा.अ. ६/३/२५
25. पा.अ. ६/३/२६
26. पा.अ. ६/३/२७
27. पा.अ. ६/३/३२
28. पा.अ. १/१/५५
29. पा.अ. २/४/८३
30. पा.अ. १/१/७२
31. पा.अ. ५/४/८८
32. पा.अ. ५/४/८९
33. पा.अ. ५/४/९0
34. पा.अ. ६/३/४८
35. पा.अ. ५/४/११८
36. पा.अ. ५/४/१२६
37. पा.अ. ५/४/१३0
38. पा.अ. ५/४/१४१
39. पा.अ. ६/३/५२
40. पा.अ. ६/३/५७
41. सम्पादकीयम्, काशिकावृत्तिः, १म भाग(द्वितीय सं),उद्धृत कारिका, पृः 13।

**ग्रन्थपञ्जी–**


1. मुखोपाध्यायः सच्चिदानन्दः, वैयाकरणसिद्धान्तकौमुदी(समासप्रकरणम्), कलिकाता, साहित्यनिकेतनम्, 2012–2013 (पुनर्मुद्रित)।
2. भट्टाचार्यः ड.तपनशङ्करः, अष्टाध्यायी, संस्कृत वुक डिपो, कोलकाता 2012, पुनर्मुद्रितः।
3. साहा ड. विश्वरूपः, समासप्रकरण, सदेश, १म संस्करण २०१३।
4. शर्मा गिरिधर एवं शर्मा परमेश्वरानन्दः, वैयाकरणसिद्धान्तकौमुदी(द्वितीयो भागः), मोतिलाल वनारसीदास, वाराणसी–२००४।
5. चक्रवर्ती ड. सत्यनारायण, पाणिनीय शब्दशास्त्र, संस्कृत पुस्तक भाण्डार, कोलकाता, पुणर्मुद्रण २०१६।
6. भट्टाचार्यः ड.तपनशङ्करः, वौयाकरणसिद्धान्तकौमुद्या समासप्रकरणम् (प्रथमः भागः), त्रैलोक्यनाथचतुष्पाठी, कलकाता, प्रथमः प्रकाशः २०१८।
7. हालदार गुरुपद, व्याकरणदर्शनेर इतिहास, संस्कृत वुक डिपो, कलकाता, २००६।
8. गङ्गोपाध्याय मृणालकान्ति, वैयाकरणसिद्धान्तकौमुदी(संज्ञापरिभाषाप्रकरणम्), संस्कृत वुक डिपो, कोलकाता, १म संस्करण २००४ ।
9. शास्त्री चारुदेव(अनुवादक व विवरणकार), व्याकरण महाभाष्य, मोतीलाल वनारसीदास, वाराणसी, १म संस्करणम्।